


देवीस्तोत्रपञ्चकम्

श्रीः ।

स्तोत्ररत्नमालान्तर्गत-

देवीस्तोत्रपञ्चकम् ।

(अन्नपूर्णा-बगलामुखी-लक्ष्मी-त्रैलोक्यमङ्गल-
लक्ष्मी-भुवनेश्वरीणां स्तोत्राणि.

मुद्रक एवं प्रकाशकः
खेमराज श्रीकृष्णदास,
अध्यक्ष : श्रीवेंकटेश्वर प्रेस,
खेमराज श्रीकृष्णदास मार्ग, बम्बई-४०० ००४

संस्करण : अप्रेल २०१३, संवत् २०७०

मूल्य : १० रुपये मात्र

मुद्रक एवं प्रकाशक:
खेमराज श्रीकृष्णदास,™
अध्यक्ष : श्रीवेंकटेश्वर प्रेस,
खेमराज श्रीकृष्णदास मार्ग,
मुंबई - ४०० ००४.

Printers & Publishers
Khemraj Shrikrishnadass
Prop: Shri Venkateshwar Press
Khemraj Shrikrishnadass Marg,
7th Khetwadi, Mumbai - 400 004.

Web Site : http://www.khe-shri.com
E-mail : khemraj@vsnl.com

Printed by Sanjay Bajaj for M/s Khemraj Shrikrishnadass
Prop. Shri Venkateshwar Press, Mumbai-400004,
at their Shri Venkateshwar Press, 66 Hadapsar Industrial Estate,
Pune -411 013.

श्री:।

अन्नपूर्णास्तोत्रम् ।

श्रीगणेशाय नमः ।

नित्यानन्दकरी वराभयकरी सौन्दर्य्यरत्नाकरी,
निर्धूताखिलघोरपावनकरी प्रत्यक्षमाहेश्वरी ॥
प्रालेयाचलवंश-पावनकरी काशीपुराधीश्वरी,
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी
॥ १ ॥ नानारत्नविचित्रभूषणकरी हेमाम्बरा-
डम्बरी, मुक्ताहारविलम्बमानविलसद्वक्षोजकु-
म्भान्तरी॥ काश्मीरागुरुवासितारुचिकरी काशी-
पुराधीश्वरी, भिक्षां देहि कृपावलम्बनकरी
मातान्नपूर्णेश्वरी ॥२॥ योगानन्दकरी रिपुक्षयकरी
धर्मार्थनिष्ठाकरी, चन्द्रार्कानलभासमानलहरी
त्रैलोक्यरक्षाकरी ॥ सर्वैश्वर्य्यसमस्तवाञ्छित-
करी काशीपुराधीश्वरी, भिक्षां देहि कृपावलम्ब-

नकरी मातान्नपूर्णेश्वरी ॥ ३ ॥ कैलासाचल-
कन्दरालयकरी गौरी उमा शंकरी, कौमारी
निगमार्थगोचरकरी ओंकारबीजाक्षरी ॥ मोक्षद्वा-
रकपाटपाटनकरी काशीपुराधीश्वरी, भिक्षां देहि
कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥ ४ ॥
दृश्यादृश्यप्रभूतवाहनकरी ब्रह्माण्डभाण्डोदरी,
लीलानाटकसूत्रभेदनकरी विज्ञानदीपांकुरी ॥
श्रीविश्वेशमनःप्रसादनकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णे-
श्वरी ॥ ५ ॥ उर्व्वी-सर्वजनेश्वरी भगवती माता-
न्नपूर्णेश्वरी, वेणीनीलसमानकुन्तलहरी नित्या-
न्नदानेश्वरी ॥ सर्वानन्दकरी दशाशुभकरी
काशीपुराधीश्वरी, भिक्षां देहि कृपावलम्बन-
करी मातान्नपूर्णेश्वरी ॥ ६ ॥ आदीक्षान्तसम-
स्तवर्णनकरी शम्भोस्त्रिभावाकरी, काश्मीरा
त्रिजनेश्वरी त्रिलहरी नित्यांकुरा शर्व्वरी ॥ कामा-

कांक्षकरी जनोदयकरी काशीपुराधीश्वरी, भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥ ७ ॥ देवी सर्वविचित्ररत्नरचिता दाक्षायणी सुन्दरी, वामस्वादुपयोधरप्रियकरी सौभाग्यमाहेश्वरी ॥ भक्ताभीष्टकरी दशाशुभकरी काशीपुराधीश्वरी, भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥ ८ ॥ चन्द्रार्कानलकोटिकोटिसदृशा चन्द्रांशुबिम्बाधरी, चन्द्रार्काग्निसमानकुण्डलधरी चन्द्रार्कवर्णेश्वरी ॥ मालापुस्तकपाशकांकुशधरी काशीपुराधीश्वरी, भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥ ९ ॥ क्षत्रत्राणकरी महाभयकरी माता कृपासागरी, साक्षान्मोक्षकरी सदा शिवकरी विश्वेश्वरश्रीधरी ॥ दक्षाक्रन्दकरी निरामयकरी काशीपुराधीश्वरी, भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥ १० ॥ अन्नपूर्णे सदापूर्णे शंकर-

प्राणवल्लभे ॥ ज्ञानवैराग्यसिद्धयर्थं भिक्षां देहि च पार्व्वति ॥ ११ ॥ माता च पार्वती देवी पिता देवो महेश्वरः ॥ बान्धवाः शिवभक्ताश्च स्वदेशो भुवनत्रयम् ॥ १२ ॥ इति श्रीमच्छंकराचार्य्यविरचितमन्नपूर्णास्तोत्रं समाप्तम् ॥

अथ बगलामुखीस्तोत्रम् ।

चलत्कनककुण्डलोल्लसित-चारुगण्डस्थलीं, लसत्कनकचम्पकद्युतिमदिन्दुबिम्बाननाम् ॥ गदाहत-विपक्षकां कलितलोलजिह्वाञ्चलां, स्मरामि बगलामुखीं विमुखवाङ्मनःस्तम्भिनीम् ॥ १ ॥ पीयूषोदधिमध्यचारु-विलसद्रक्तोत्पले मण्डपे यत्सिंहासनमौलिपातितरिपुः प्रेतासनाध्यासिनीम् ॥ स्वर्णाभां करपीडितारिरसनां भ्राम्यद्गदाविभ्रमामित्थं ध्यायति यान्ति तस्य सहसा सद्योऽथ सर्व्वापदः ॥ २ ॥ देवि ! त्वच्चरणाम्बुजार्चनकृते यः

पीतपुष्पांजलिं, भक्त्या वामकरे विधाय च मनुं मन्त्री मनोज्ञाक्षरम् ॥ पीठध्यान-परोऽथ कुम्भकवशाद्बीजं स्मरेत्पार्थिवं, तस्या-मित्रमुखस्य वाचि हृदये जाड्यं भवेत्तत्क्षणात् ॥ ३ ॥ वादी मूकति रङ्कति क्षितिपतिर्वैश्वा-नरः शीतति, क्रोधी शाम्यति दुर्ज्जनः सुज-नति क्षिप्रानुगः खञ्जति ॥ गर्व्वी खर्व्वति सर्व्वविच्च जडति त्वन्मन्त्रिणा मन्त्रितः, श्री-नित्ये ! बगलामुखि ! प्रतिदिनं कल्याणि ! तुभ्यं नमः ॥ ४ ॥ मन्त्रस्तावदलं विपक्षदलने स्तोत्रं पवित्रञ्च ते, यन्त्रं वादिनियन्त्रणं त्रिजगतां जैत्रन्तु चित्रं नु ते ॥ मातः ! श्रीबग-लेति नाम ललितं यस्यास्ति जन्तोर्मुखे, तन्नाम-ग्रहणेन संसदि मुखस्तम्भो भवेद्वादि-नाम् ॥ ५ ॥ दुष्टस्तम्भनमुग्रविघ्नशमनं दारि-द्र्यविद्रावणं, भूभृद्भूशमनं चलन्मृगदृशां चेतः

समाकर्षणम् ॥ सौभाग्यैकनिकेतनं मम दृशः कारुण्य–पूर्णामृतं, मृत्योर्म्मारणमाविरस्तु पुरतो मातस्त्वदीयं वपुः ॥ ६ ॥ मातर्भञ्जय मे विपक्षवदनं जिह्वां चलां कीलय, ब्राह्मीं मुद्रय नाशयाशु धिषणामुग्रां गतिं स्तंभय ॥ शत्रूंश्चूर्णय देवि ! तीक्ष्णगदया गौरांगि ! पीतांबरे, विघ्नौघं बगले ! हर प्रणमतां कारुण्यपूर्णेक्षणे ! ॥ ७ ॥ मातर्भैरवि भद्रकालि विजये वाराहि विश्वाश्रये. श्रीविद्ये समये महेशि बगले कामेशि रामे रमे ॥ मातङ्गि त्रिपुरे परात्परतरे स्वर्गापवर्गप्रदे ! दासोऽहं शरणागतः करुणया विश्वेश्वरि ! त्राहि माम् ॥ ॥ ८ ॥ संरम्भे चौरसंघे प्रहरणसमये बन्धने व्याधिमध्ये, विद्यावादे विवादे प्रकुपितनृपतौ दिव्यकाले निशायाम् ॥ वश्ये वा स्तम्भने वा रिपुवधसमये निर्जने वा वने वा, गच्छंस्तिष्ठंस्त्रि-

कालं यदि पठति शिवं प्राप्नुयादाशु धीरः ॥ ९॥
नित्यं स्तोत्रमिदं पवित्रमिह यो देव्याः पठत्या-
दराद्, धृत्वा यन्त्रमिदं तथैव समये बाहौ करे
वा गले ॥ राजानोऽप्यरयो मदान्ध-करिणः
सर्पा मृगेन्द्रादिकास्ते वै यान्ति विमोहिता
रिपुगणा लक्ष्मीः स्थिराः सिद्धयः ॥ १० ॥
त्वं विद्या परमा त्रिलोकजननी विघ्नौघसंछे-
दिनी, योषाकर्षणकारिणी जनमनःसन्दोहस-
न्दायिनी ॥ स्तम्भोत्सारणकारिणी पशुमनः-
सम्मोहसन्दायिनी, जिह्वाकीलनभैरवी विज-
यते ब्रह्मादिमन्त्रो यथा ॥ ११ ॥ विद्यां लक्ष्मीं
सर्वसौभाग्यमायुः, पुत्रैः पौत्रैः सर्वसाम्राज्य-
सिद्धिम् ॥ मानं भोगो वश्यमारोग्य-सौख्यं,
प्राप्तं तद्भूतलेऽस्मिन्नरेण ॥ १२ ॥ यत्कृतं जप-
सन्नाहं गदितं परमेश्वरि ॥ दुष्टानां निग्रहार्थाय
तद्गृहाण नमोऽस्तु ते ॥ १३ ॥ ब्रह्मास्त्रमिति

विख्यातं त्रिषु लोकेषु दुर्लभम् ॥ गुरुभक्ताय दातव्यं न देयं यस्य कस्यचित् ॥१४॥ पीताम्बरां द्विभुजाञ्च त्रिनेत्रां गात्रकोज्ज्वलाम् ॥ शिलामुद्गरहस्ताञ्च स्मरेत्तां बगलामुखीम् ॥ ॥ १५ ॥ प्रातर्म्मध्याह्नकाले स्तवपठनमिदं कार्य्यसिद्धिप्रदं स्यात् ॥ १६ ॥ इति रुद्रयामले श्रीबगलामुखी-स्तोत्रं समाप्तम् ॥

अथ लक्ष्मीस्तोत्रम् ।

श्रीशंकर उवाच ।

अथातः संप्रवक्ष्यामि लक्ष्मीस्तोत्रमनुत्तमम् ॥ पठनाच्छ्रवणाद्यस्य नरो मोक्षमवाप्नुयात्॥ १ ॥ गुह्याद्गुह्यतरं पुण्यं सर्वदेवनमस्कृतम् ॥ सर्व्वमन्त्रमयं साक्षाच्छृणु पर्व्वतनन्दिनि ॥ २ ॥ अनन्तरूपिणी लक्ष्मीरपारगुणसागरी ॥ अणिमादिसिद्धिदात्री शिरसा प्रणमाम्यहम् ॥ ३ ॥ आपदुद्धारिणी त्वं हि आद्यशक्तिः शुभा परा ॥

आद्या आनन्ददात्री च शिरसा प्रणमाम्यहम् ॥
॥ ४ ॥ इन्दुमुखी इष्टदात्री इष्टमंत्रस्वरूपिणी ॥
इच्छामयी जगन्मातः शिरसा प्रणमाम्यहम्॥५॥
उमा उमापतेस्त्वन्तु उत्कण्ठा कुलवर्धिनी ॥
ऊर्वीश्वरी जगन्मातर्लक्ष्मीदेवि नमोऽस्तु ते ॥
॥६॥ ऐरावतपतिपूज्या ऐश्वर्याणां प्रदायिनी॥
औदार्य्यगुणसम्पन्ना लक्ष्मीदेवि नमोऽस्तु ते॥७॥
कृष्णवक्षः स्थिता देवि कलिकल्मषनाशिनी ॥
कृष्णचित्तहरा कर्त्री शिरसा प्रणमाम्यहम्
॥ ८ ॥ कन्दर्पदमना देवि कल्याणी कमला
नना ॥ करुणार्णवसम्पूर्णा शिरसा प्रणमाम्यहम्
॥ ९ ॥ खञ्जनाक्षी खगनासा देवि खेदविना-
शिनी ॥ खञ्जरीटगतिश्चैव शिरसा प्रणमाम्य-
हम् ॥ १० ॥ गोविंदवल्लभा देवि गन्धर्व्वकु-
लपावनी ॥ गोलोकवासिनी मातः शिरसा
प्रणमाम्यहम् ॥ ११ ॥ ज्ञानदा गुणदा देवि

गुणाध्यक्षा गुणाकरी ॥ गन्धपुष्पधरा मातः शिरसाप्रणमाम्यहम् ॥ १२ ॥ घनश्याम-प्रिया देवि घोरसंसारतारिणी ॥ घोरपापहरा चैव शिरसा प्रणमाम्यहम् ॥ १३ ॥ चतुर्व्वेदमयी चिन्त्या चित्तचैतन्यदायिनी ॥ चतुराननपूज्या च शिरसा प्रणमाम्यहम् ॥ १४ ॥ चैतन्यरूपिणी देवि चन्द्रकोटिसमप्रभा ॥ चन्द्रार्कनखरज्योतिर्लक्ष्मीदेवि नमाम्यहम् ॥ १५ ॥ चपला चतुराध्यक्षी चरमे गतिदायिनी ॥ चराचरेश्वरी लक्ष्मि शिरसा प्रणमाम्यहम् ॥ १६ ॥ छत्र-चामरयुक्ता च छत्रचातुर्य्यनाशिनी ॥ छिद्रौ-घहारिणी मातः शिरसा प्रणमाम्यहम् ॥ १७ ॥ जगन्माता जगत्कर्त्री जगदाधाररूपिणी ॥ जयप्रदा जानकी च शिरसा प्रणमाम्यहम् ॥ ॥ १८ ॥ जानकीशप्रिया त्वं हि जनकोत्सवदायिनी ॥ जीवात्मनी च त्वं मातः शिरसा

प्रणमाम्यहम् ॥ १९ ॥ झिञ्झीरवस्वना देवि
झञ्झावातनिवारिणी ॥ झर्झरप्रियवाद्यां च
शिरसा प्रणमाम्यहम् ॥ २० ॥ टङ्कप्रदायिनी
त्वं हि त्वञ्च ठंकाररूपिणी ॥ ढक्कादिवाद्यप्र-
णया डम्फवाद्यविनोदिनी ॥ डमरुप्रणया
मातः शिरसा प्रणमाम्यहम् ॥ २१ ॥ तप्तका-
ञ्चनवर्णाभा त्रैलोक्यलोकतारिणी ॥ त्रिलोक-
जननी लक्ष्मीः शिरसा प्रणमाम्यहम् ॥ २२ ॥
त्रैलोक्यसुन्दरी त्वं हि तापत्रयनिवारिणी ॥
त्रिगुणधारिणी मातः शिरसा प्रणमाम्यहम्
॥ २३ ॥ त्रैलोक्यमङ्गला त्वं हि तीर्थमूलपद-
द्वया ॥ त्रिकालज्ञा त्राणकर्त्री शिरसा प्रणमा-
म्यहम् ॥ २४ ॥ दुर्गतिनाशिनी त्वं हि दारिद्र्या-
पद्विनाशिनी ॥ द्वारकावासिनी मातः शिरसा
प्रणमाम्यहम् ॥ २५ ॥ देवतानां दुराध्या
दुःखशोकविनाशिनी ॥ दिव्याभरणभूषांगी

शिरसा प्रणमाम्यहम् ॥ २६ ॥ दामोद-
रप्रियां त्वं हि दिव्ययोगप्रदर्शिनी ॥ दयामयी
दयाध्यक्षी शिरसा प्रणमाम्यहम् ॥ २७॥
ध्यानातीता धराध्यक्षा धनधान्यप्रदायिनी ॥
धर्म्मदा धैर्य्यदा मातः शिरसा प्रणमाम्यहम् ॥
॥ २८॥ नवगोरोचना गौरी नन्दनन्दनगेहिनी॥
नवयौवनचार्व्वङ्गी शिरसा प्रणमाम्यहम् ॥
॥ २९ ॥ नानारत्नादिभूषाढ्या नानारत्नप्रदा-
यिनी ॥ नितम्बिनी नलिनाक्षी लक्ष्मीदेवि
नमोऽस्तु ते ॥ ३० ॥ निधुवनप्रेमानन्दा निरा-
श्रयगतिप्रदा ॥ निर्व्विकारा नित्यरूपा लक्ष्मी-
देवि नमोऽस्तु ते॥ ३१ ॥ पूर्णानन्दमयी त्वं हि
पूर्णब्रह्मसनातनी ॥ परा शक्तिः परा भक्तिर्ल-
क्ष्मीदेवि नमोऽस्तु ते ॥ ३२ ॥ पूर्णचन्द्रमुखी त्वं
हि परानन्दप्रदायिनी ॥ परमार्थप्रदा लक्ष्मि
शिरसा प्रणमाम्यहम् ॥ ३३ ॥ पुण्डरीकाक्षिणी

त्वं हि पुण्डरीकाक्षगेहिनी ॥ पद्मरागधरा त्वं हि शिरसा प्रणमाम्यहम् ॥ ३४ ॥ पद्मा पद्मासना त्वं हि पद्ममालाविधारिणी ॥ प्रणवरूपिणी मातः शिरसा प्रणमाम्यहम् ॥ ३५ ॥ फुल्लेन्दुवदना त्वं हि फणिवेणिविमोहिनी ॥ फणिशायिप्रिया मातः शिरसा प्रणमाम्यहम् ॥ ३६ ॥ विश्वकर्त्री विश्वभर्त्री विश्वत्रात्री विश्वेश्वरी ॥ विश्वाराध्या विश्ववाह्या लक्ष्मीदेवि नमोऽस्तु ते ॥ ३७ ॥ विष्णुप्रिया विष्णुशक्तिबीजमन्त्रस्वरूपिणी ॥ वरदा वाक्यसिद्धा च शिरसा प्रणमाम्यहम् ॥३८॥ वेणुवाद्यप्रिया त्वं हि वंशीवाद्यविनोदिनी ॥ विद्युद्गौरी महादेवि लक्ष्मीदेवि नमोऽस्तु ते ॥३९॥ भुक्तिमुक्तिप्रदा त्वं हि भक्तानुग्रहकारिणी ॥ भवार्णवत्राणकर्त्री लक्ष्मीदेवि नमोऽस्तु ते ॥ ४० ॥ भक्तप्रिया

भागीरथी भक्तमङ्गलदायिनी ॥ भयदाऽभय-
दात्री च लक्ष्मीदेवि नमोऽस्तु ते ॥४१॥ मनोऽ-
भीष्टप्रदा त्वं हि महामोहविनाशिनी ॥
मोक्षदा मानदात्री च लक्ष्मीदेवि नमोऽस्तु ते ॥
॥ ४२ ॥ महाधन्या महामान्या माधवमनोमो-
हिनी ॥ मुखरा प्राणहन्त्री च लक्ष्मीदेवि नमो-
ऽस्तु ते ॥ ४३ ॥ यौवनपूर्णसौन्दर्य्या योगमाया
योगेश्वरी ॥ युग्मश्रीफलवक्षाश्च लक्ष्मीदेवि
नमोऽस्तु ते ॥ ४४ ॥ युग्माङ्गदविभूषाढ्या युव-
तीनां शिरोमणिः ॥ यशोदासुतपत्नी च लक्ष्मी-
देवि नमोऽस्तु ते ॥ ४५ ॥ रूपयौवनसम्पन्ना
रत्नालङ्कारधारिणी ॥ राकेन्दुकोटिसौंदर्य्ये
लक्ष्मीदेवि नमोऽस्तु ते ॥ ४६ ॥ रमा रामा राम-
पत्नी राजराजेश्वरी तथा ॥ राज्यदा राज्य-
हन्त्री च लक्ष्मीदेवि नमोऽस्तु ते ॥ ४७ ॥
लीलालावण्यसम्पन्ना लोकानुग्रहकारिणी ॥

ललनाप्रीतिदात्री च लक्ष्मीदेवि नमोऽस्तु ते ॥ ॥ ४८ ॥ विद्याधरी तथा विद्या वसुदा त्वन्तु वन्दिता ॥ विन्ध्याचलवासिनी च लक्ष्मीदेवि नमोऽस्तु ते ॥ ४९ ॥ शुभकांचनगौरांगी शङ्ख-कंकणधारिणी ॥ शुभदा शीलसम्पन्ना लक्ष्मीदेवि नमोऽस्तु ते ॥ ५० ॥ षट्चक्रभेदिनी त्वं हि षडैश्वर्य्यप्रदायिनी ॥ षोडशी वयसा त्वन्तु लक्ष्मीदेवि नमोऽस्तु ते ॥ ५१ ॥ सदानन्दमयी त्वं हि सर्व्वसम्पत्तिदायिनी ॥ संसारतारिणी देवि शिरसा प्रणमाम्यहम् ॥ ५२ ॥ सुकेशी सुखदा देवि सुन्दरी सुमनोरमा ॥ सुरेश्वरी सिद्धिदात्री शिरसा प्रणमाम्यहम् ॥ ५३ ॥ सर्व्वसंकटहंत्री त्वं सत्यसत्त्वगुणान्विता ॥ सीतापतिप्रिया देवि शिरसा प्रणमाम्यहम् । ॥ ५४ ॥ हेमांगिनी हास्यमुखी हरिमनोविमो-हिनी ॥ हरिपादाश्रया देवि शिरसा प्रणमाम्य

ह्म् ॥ ५५ ॥ क्षेमंकरी क्षमादात्री क्षौमवासो-
विधारिणी ॥ क्षीणमध्या च क्षेत्राङ्गी लक्ष्मी-
देवि नमोऽस्तुते ॥ ५६ ॥

श्रीशंकर उवाच ।

अकारादिक्षकारान्तं लक्ष्मीदेव्याः स्तवं शुभम्॥
पठितव्यं प्रयत्नेन त्रिसन्ध्यञ्च दिने दिने॥५७॥
पूजनीया प्रयत्नेन कमला करुणामयी॥वाञ्छा-
कल्पलता साक्षाद्भुक्तिमुक्तिप्रदायिनी ॥ ५८ ॥
इदं स्तोत्रं पठेद्यस्तु शृणुयाच्छ्रावयेदपि ॥ इष्ट-
सिद्धिर्भवेत्तस्य सत्यं सत्यं हि पार्वति ॥ ५९ ॥
इदं स्तोत्रं महापुण्यं यः पठेद्भक्तिसंयुतः ॥ तं च
दृष्ट्वा भवेन्मूको वादी सत्यं न संशयः ॥ ६० ॥
शृणुयाच्छ्रावयेद्यस्तु पठेद्वा पाठयेदपि ॥
राजानो वशमायांति तं दृष्ट्वा गिरिनंदिनि ॥
॥ ६१ ॥ तं दृष्ट्वा दुष्टसंघाश्च पलायन्ते दिशो
दश ॥ भूतप्रेतग्रहा यक्षा राक्षसाः पन्नगादयः ॥

विद्रवन्ति भयार्त्ता वै स्तोत्रस्यापि च कीर्त्त-
नात् ॥ ६२ ॥ सुराश्च असुराश्चैव गन्धर्व्वकि-
न्नरादयः ॥ प्रणमन्ति सदा भक्त्या तं दृष्ट्वा
पाठकं मुदा ॥ ६३ ॥ धनार्थी लभते चार्थं
पुत्रार्थी च सुतं लभेत् ॥ राज्यार्थी लभते राज्यं
स्तवराजस्य कीर्त्तनात् ॥ ६४ ॥ ब्रह्महत्या सुरा-
पानं स्तेयं गुर्व्वङ्गनागमः ॥ महापापोपपापञ्च
तरन्ति स्तवकीर्त्तनात् ॥ ६५ ॥ गद्यपद्यमयी
वाणी वदनात्तु प्रजायते ॥ अष्टसिद्धिमवाप्नोति
लक्ष्मीस्तोत्रस्य कीर्त्तनात् ॥ ६६ ॥ वन्ध्या
चापि लभेत्पुत्रं गर्भिणी प्रसवेत्सुतम् ॥ पठ-
नात्स्मरणात्सत्यं वच्मि ते गिरिनन्दिनि॥६७॥
भूर्ज्जपत्रे समालिख्य रोचनाकुंकुमेन तु ॥
भक्त्या संपूजयेद्यस्तु गन्धपुष्पाक्षतैस्तथा॥६८॥
धारयेद्दक्षिणे बाहौ पुरुषः सिद्धिकाङ्क्षया ॥
योषिद्वामभुजे धृत्वा सर्व्वसौख्यमयी भवेत् ॥
॥ ६९ ॥ विषं निर्विषतां याति अग्निर्याति

च शीतताम् ॥ शत्रवो मित्रतां यान्ति स्तवस्या-
स्य प्रसादतः ॥ ७० ॥ बहुना किमिहोक्तेन
स्तवस्यास्य: प्रसादतः ॥ वैकुण्ठे च वसेन्नित्यं
सत्यं वच्मि सुरेश्वरि ॥ ७१ ॥ इति रुद्रयामले
हरपार्व्वतीसंवादे अकारादिक्षकारान्तवर्णग्रथितं
लक्ष्मीस्तोत्रं समाप्तम् ।

अथ त्रैलोक्यमंगलं नाम लक्ष्मीस्तोत्रम् ।

नमः कल्याणदे देवि नमोऽस्तु हरिवल्लभे ॥ नमो
भक्तप्रिये देवि लक्ष्मीदेवि नमोऽस्तु ते ॥ १ ॥
नमो मायागृहीतांगि नमोऽस्तु हरिवल्लभे ॥ सर्व्वे-
श्वरि नमस्तुभ्यं लक्ष्मीदेवि नमोऽस्तु ते ॥ २ ॥
महामाये विष्णुधर्मपत्नीरूपे हरिप्रिये ॥ वाञ्छा-
दात्रि सुरेशानि लक्ष्मीदेवि नमोऽस्तु ते ॥ ३ ॥
उद्यद्भानुसहस्राभे नयनत्रयभूषिते ॥ रत्ना-
धारे सुरेशानि लक्ष्मीदेवि नमोऽस्तु ते ॥ ४ ॥

विचित्रवसने देवि भवदुःखविनाशिनि ॥ कुच-
भारनते देवि लक्ष्मीदेवि नमोऽस्तु ते ॥ ५ ॥
साधकाभीष्टदे देवि अन्नदानरतेऽनघे ॥ विष्ण्वा-
नन्दप्रदे मातर्लक्ष्मीदेवि नमोऽस्तु ते ॥ ६ ॥
षट्कोणपद्ममध्यस्थे षडङ्गयुवतीमये ॥ ब्रह्मा-
ण्यादिस्वरूपे च लक्ष्मीदेवि नमोऽस्तु ते ॥७ ॥
देवि त्वं चन्द्रवदने सर्व्वसाम्राज्यदायिनि ॥
सर्व्वानन्दकरे देवि लक्ष्मीदेवि नमोऽस्तु ते ॥
॥ ८॥पूजाकाले पठेद्यस्तु स्तोत्रमेतत्समाहितः॥
तस्य गेहे स्थिरा लक्ष्मीर्लक्ष्मीदेवि नमोऽस्तु
ते ॥ ९ ॥ प्रातःकाले पठेद्यस्तु मन्त्रपूजापुरः-
सरम् ॥ तस्य चान्नसमृद्धिः स्याद्वर्द्धमाना दिने
दिने॥ १० ॥यस्मै कस्मै न दातव्यं न प्रकाश्यं
कदाचन ॥ प्रकाशात्कार्य्यहानिः स्यात्तस्माद्य-
त्नेन गोपयेत् ॥ ११ ॥ त्रैलोक्यमंगलं नाम
स्तोत्रमेतत्प्रकीर्त्तितम् ॥ ब्रह्मविद्यास्वरूपञ्च महदै-
श्वर्य्यदायकम् ॥१२॥ पठनाद्धारणान्मर्त्यस्त्रैलो-

र्वैश्वर्य्यवान्भवेत् ॥ यद्धृत्वा पठनाद्देवाः सर्व्वै-
श्वर्य्यमवाप्नुयुः ॥ १३ ॥ ब्रह्मा विष्णुश्च रुद्रश्च
धारणात्पठनाद्यतः ॥ सृजत्यवति हन्त्येव कल्पे
कल्पे पृथक्पृथक् ॥ १४ ॥ पुष्पाञ्जल्यष्टकं दत्त्वा मूले
नैव पठेत्ततः ॥ युगकृतकृतायास्तु पूजायाः फल-
माप्नुयात् ॥ १५ ॥ प्रीतिमन्योन्यतः कृत्वा कमला
निश्चला गृहे ॥ वाणी वक्त्रे वसेत्तस्य सत्यंसत्यं
न संशयः ॥ १६ ॥ अष्टोत्तरशतञ्चास्य पुरश्चर्य्या-
विधिः स्मृतः ॥ १७ ॥ भूर्ज्जे विलिख्य गुटिकां
स्वर्णस्थां धारयेद्यदि ॥ कण्ठे वा दक्षिणे बाहौ
सोऽपि सर्व्वतपोमयः ॥ १८ ॥ ब्रह्मास्त्रादीनि
शस्त्राणि तद्गात्रं प्राप्य पार्व्वति ॥ माल्यानि
कुसुमान्येव भवन्त्येव न संशयः ॥ १९ ॥ अस्यापि
पठनात्सद्यः कुबेरोऽपि धनाधिपः ॥ इन्द्राद्याः
सकला देवा अस्य संधारणाद्यतः ॥ सर्व्वसि-
द्धीश्वराः सन्तः सर्व्वैश्वर्य्यमवाप्नुयुः ॥ २० ॥

पुष्पाञ्जल्यष्टकं देव्यै मूलेनैव सकृत्पठेत् ॥ संव-
त्सरकृतायास्तु पूजायाः फलमाप्नुयात् ॥ २१॥
यो धारयति पुण्यात्मा त्रैलोक्यमङ्गलन्त्विव-
दम् ॥ स्तोत्रन्तु परमं पुण्यं सोऽपि पुण्यवतां
वरः ॥ २२ ॥ सर्वैश्वर्य्ययुतो भूत्वा त्रैलोक्य-
विजयी भवेत् ॥ पुरुषो दक्षिणे बाहौ नारी
वामभुजे तथा ॥ बहुपुत्रवती भूत्वा वन्ध्या-
पि लभते सुतम् ॥ २३ ॥ ब्रह्मास्त्रादीनि
शस्त्राणि नैव कृन्तन्ति तं जनम् ॥ पठेद्वा
धारयेद्वापि यो नरो भक्तितत्परः ॥ २४ ॥एतत्तु
स्तोत्रमज्ञात्वा योऽर्च्चयेज्जगदीश्वरीम् ॥ दारिद्र्यं
परमं प्राप्य सोऽचिरान्मृत्युमाप्नुयात् ॥२५॥ यः
पठेत्प्रातरुत्थाय सर्वतीर्थफलं लभेत् ॥यः पठे-
दुभयोः सन्ध्योस्तस्य विघ्नं न विद्यते ॥ २६ ॥
धारयेद्यः स्वदेहे तु तस्य विघ्न न कुत्रचित्॥भूत-
प्रेतपिशाचेभ्यो भयं तस्य न विद्यते॥२७॥राज

द्वारे रणे वापि सर्वत्र विजयी भवेत् ॥ सर्व्वत्र
पूजामाप्नोति देवीपुत्र इव क्षितौ ॥२८ ॥ एत-
त्स्तोत्रं महापुण्यं धर्म्मकामार्थसिद्धिदम् ॥
यत्र तत्र न वक्तव्यं गोपितव्यं प्रयत्नतः॥ २९॥
गोपितं सर्वतंत्रेषु सारात्सारं प्रकीर्त्तितम् ॥
सर्वत्र सुलभा विद्या स्तोत्रमेतत्सुदुर्लभम् ॥३०॥
शठाय भक्तिहीनाय निन्दकाय महेश्वरि ॥
न्यूनांगे चातिरिक्तांगे क्रूरे मिथ्याविभा-
षिणि ॥ न स्तव दर्शयेद्दिव्यं परमं सुदुर्ल-
भम् ॥ ३१ ॥ यत्र तत्र न वक्तव्यं मया तु
परिभाषितम् ॥ दत्त्वा तेभ्यो महेशानि नश्य-
न्ति सिद्धयः क्रमात् ॥ ३२ ॥ मंत्राः पराङ्
मुखा यान्ति शापं दत्त्वा सुदारुणम् ॥ अशुभञ्च
भवेत्तस्य तस्माद्यत्नेन गोपयेत् ॥ ३३ ॥ गोरो-
चनाकुंकुमेन भूर्ज्जपत्रे महेश्वरि ॥ लिखित्वा
शुभयोगे च ब्रह्मेन्द्रो वै धृतो यथा ॥ सर्व्वार्थ-
सिद्धिमाप्नोति सत्यं सत्यं न संशयः ॥ ३४ ॥

कुमारीं पूजयित्वा तु देवीसूक्तं निवेद्य च ॥
पठित्वा भोजयेद्विप्रान्धनवान्वेदपारगान् ॥
॥ ३५ ॥ नाधयो व्याधयस्तस्य दुःखशोकभयं
नहि ॥ वादी मूको भवेद्दृष्ट्वा राजा च सेवका-
यते ॥ ३६ ॥ मासमेकं पठेद्यस्तु प्रत्यहं
नियतः शुचिः ॥ दिवा भवेद्धविष्याशी रात्रौ
शक्तिपरायणः ॥ तस्य सर्वार्थसिद्धिः स्यात्स-
त्यं सत्यं महेश्वरि ॥ ३७ ॥ षट्सहस्रप्रमाणेन
प्रत्यहं प्रजपेत्सदा ॥ षण्मासैर्वा त्रिभिर्मासैः
खेचरो भवति ध्रुवम् ॥ ३८ ॥ अपुत्रो लभते
पुत्रमधनो धनवान्भवेत् ॥ अरोगी बलवांश्चैव
राजा च दासतामियात् ॥ ३९ ॥ य एवं
कुरुते धीमान्स एव कमलापतिः ॥ स एव श्री-
महादेवस्तस्य पत्नी हरिप्रिया ॥ ४० ॥ बहुना
किमिहोक्तेन स्तवस्यास्य प्रसादतः ॥ धर्म्मा-
र्थकाममोक्षञ्च लभते नात्र संशयः ॥ ४१ ॥

इति ते कथितं देवि त्रैलोक्यमंगलाभिधम् ॥
लक्ष्मीस्तोत्रं महापुण्यं संसारार्णवतारकम् ॥
॥४२॥ ऋजवे सुचरित्राय विष्णुभक्तिपराय च॥
दातव्यञ्च प्रयत्नेन परमं गोपनं त्विदम् ॥४३॥
इति श्रीशंकरभाषितं त्रैलोक्यमंगलं नाम लक्ष्मी-
स्तोत्रं समाप्तम् ॥

अथ भुवनेश्वरी-स्तोत्रम् ।

श्रीभुवनेश्वर्य्यै नमः ।

अथानन्दमयीं साक्षाच्छब्दब्रह्मस्वरूपिणीम् ॥
ईडे सकलसम्पत्त्यै जगत्कारणमम्बिकाम् ॥१॥
आद्यामशेषजननीमरविन्दयोनेर्विष्णोः शिव-
स्य च वपुः प्रतिपादयित्रीम् ॥ सृष्टिस्थितिक्षय-
करीं जगतां त्रयाणां स्तुत्वा गिरं विमलयाम्य-
हमम्बिके त्वाम् ॥ २ ॥ पृथ्व्या जलेन शिखिना
मरुताम्बरेण होत्रेन्दुना दिनकरेण च मूर्ति-
भाजः ॥ देवस्य मन्मथरिपोरपि शक्तिमत्ता-

हेतुस्त्वमेव खलु पर्व्वतराजपुत्रि ॥ ३ ॥ त्रिस्रोतसः सकललोकसमर्च्चितताया वैशिष्ट्यकारणमवैमि तदेव मातः ॥ त्वत्पादपंकजपरागपवित्रितासु शंभोर्जटासु नियतं परिवर्तनं यत् ॥ ४ ॥ आनन्दयेत्कुमुदिनीमधिपः कलानां,नान्यामिनः कमलिनीमथ नेतरां वा ॥ एकस्य मोदनविधौ परमेक ईष्टे त्वञ्च प्रपञ्चमतिनन्दयसि स्वदृष्ट्या ॥ ५ ॥ आद्याप्यशेषजगतां नवयौवनासि, शैलाधिराजतनयाप्यतिकोमलासि ॥ त्रय्याःप्रसूरपि तया न समीक्षितासि, ध्येयापि गौरि मनसो न पथि स्थितासि ॥ ६ ॥ आसाद्य जन्म मनुजेषु चिराद्दुरापं, तत्रापि पाटवमवाप्य निजेन्द्रियाणाम् ॥ नाभ्यर्च्चयन्ति जगतां जनयित्रि ये त्वां,निश्रेणिकाग्रमधिरुह्य पुनःपतंति ॥ ७ ॥ कर्पूरचूर्णहिमवारिविलोडितेन ये चंदनेन कुसुमैश्च सुजातगन्धैः॥ आराधयंति हि भवानि

निसमुत्सुकास्त्वां ते खल्वशेषभुवनादिभुवं प्रथन्ते॥८॥ आविश्य मध्यपदवीं प्रथमे सरोजे सुप्ताहि राजसदृशी विरचय्य विश्वम्॥ विद्युल्लतावलयविभ्रममुद्वहन्ती, पद्मानि पञ्च विदलय्य सहस्रवासा॥ ९॥ तन्निर्गतामृतरसैरभिषिच्य गात्रं, मार्गेण तेन विलयं पुनरप्यवाप्ता॥ येषां हृदि स्फुरसि जातु न ते भवेयुर्म्मातर्म्महेश्वरकुटुम्बिनि गर्भभाजः॥ १०॥ आलम्बिकुन्तलभरामभिराम-वक्त्रामापीवर-स्तनतटीं तनुवृत्त-मध्याम्॥ चिंताक्षसूत्रकलशालिखिताढ्यहस्तां मातर्नमामि मनसा तव गौरि मूर्तिम्॥ ॥ ११॥ आस्थाय योगमविजित्य च वैरिषट्कमाबध्य चेंद्रियगणं मनसि प्रसन्ने॥ पाशांकुशाभयवराढ्यकरां सुवक्त्रामालोकयंति भुवनेश्वरि योगिनस्त्वाम्॥ १२॥ उत्तप्तहाटकनिभां करिभिश्चतुर्भिरावर्ज्जितामृतघटैरभिषिच्यमाना॥

हस्तद्वयेन नलिने रुचिरे वहन्ती, पद्मापि साभ-
यवरा भवसि त्वमेव ॥ १३ ॥ अष्टाभिरुग्रविवि-
धायुधवाहिनीभिर्दोर्वल्लरीभिरधिरुह्य मृगाधि-
राजम् ॥ दूर्वादलद्युतिरमर्त्यविपक्षपक्षान्,
न्यक्कुर्वती त्वमसि देवि भवानि दुर्गा ॥ १४॥
आविर्निदाघजलशीकरशोभिवक्त्रां, गुञ्जाफलेन
परिकल्पित-हारयष्टिम् ॥ पत्रांशुकामसितका-
न्तिमनङ्गतन्द्रामाद्यां पुलिन्दतरुणीमसकृत्
स्मरामि ॥ १५ ॥ हंसैर्गतिक्वणितनूपुरदूरकृष्टौ
मूर्त्तैरिवाप्तवचनैरनुगम्यमानौ ॥ पद्माविवो-
र्द्ध्वमुखरूढसुजातनालौ श्रीकण्ठपत्नि शिरसैव
दधे तवांघ्री ॥ १६ ॥ द्वाभ्यां समीक्षितुमतृप्ति-
मतेव दृग्भ्यामुत्पाद्य भालनयनं वृषकेतनेन ॥
सान्द्रानुरागतरलेन निरीक्ष्यमाणे, जंघे उभे
अपि भवानि तवानतोऽस्मि ॥ १७॥ ऊरू
स्मरामि जितहस्तिकरावलेपौ स्थौल्येन मार्दव-

तया परिभूतरम्भौ ॥ श्रोणीभरस्य सहनौ परि-
कल्प्य दत्तौ, स्तम्भाविवाम्ब रभसा तव मध्य-
मेन ॥ १८ ॥श्रोण्यौ स्तनौ च युगपत्प्रथयिष्य-
तोच्चैर्बाल्यात्परेण वयसा परिकृष्टसारः ॥
रोमावलीविलसितेन विभाव्यमूर्त्तिर्म्मध्य-
स्तव स्फुरतु मे हृदयस्य मध्ये ॥ १९ ॥
सख्याः स्मरस्य हरनेत्रहुताशभीरोर्लावण्यवारि-
भरितं नवयौवनेन ॥ आपाद्य दत्तमिव पञ्च-
वमप्रधृष्यं, नाभिं कदापि तव देवि न
विस्मरेयम् ॥ २० ॥ ईशोपगूढपिशुनं भसितं
दधाने काश्मीरकर्दममनुस्तनपंकजे ते ॥ स्नानो-
त्थितस्य करिणःक्षणलक्षफेनौ सिंदूरितौ स्मर-
यतः समदस्य कुम्भौ ॥ २१ ॥ कण्ठातिरिक्तग-
लदुज्ज्वलकान्तिधाराशोभौ भुजौ निजरिपो-
र्म्मकरध्वजेन ॥ कण्ठग्रहाय रचितौ किल दीर्घ
पाशौ, मातर्म्मम स्मृतिपथं न विलंघयेत-

ताम् ॥ २२ ॥ नात्यायतं रचितकंचुविलासचौर्य्यं भूषाभरेण विविधेन विराजमानम् ॥ कण्ठं मनोहरगुणं गिरिराजकन्ये संचिन्त्य तृप्तिमुपयामि कदापि नाहम् ॥ २३ ॥ अत्यायताक्षमभिजातललाटपट्टं मन्दस्मितेन दरफुल्लकपोलरेखम् ॥ बिम्बाधरं वदनमुन्नतदीर्घनासं, यस्ते स्मरत्यसकृदम्ब स एव जातः ॥ २४ ॥ आविस्तुपारकरलेखमनल्पगन्धपुष्पोपरि भ्रमदलिव्रजनिर्विशेषम् ॥ यश्चेतसा कलयते तव केशपाशं तस्य स्वयं गलति देवि पुराणपाशः ॥ २५ ॥ श्रुतिसुचरितपाकं धीमतां स्तोत्रमेतत्पठति य इह मर्त्यो नित्यमार्द्रान्तरात्मा ॥ स भवति पदमुच्चैः सम्पदां पादनम्रक्षितिपमुकुटलक्ष्मीलक्षणानां चिराय ॥ २६ ॥ इति श्रीभुवनेश्वरीस्तोत्रं समाप्तम् ॥

हमारे प्रकाशनों की अधिक जानकारी व खरीद के लिये हमारे निजी स्थान :

खेमराज श्रीकृष्णदास
अध्यक्ष : श्रीवेंकटेश्वर प्रेस,
९१/१०९, खेमराज श्रीकृष्णदास मार्ग,
७ वी खेतवाडी बॅक रोड कार्नर,
मुंबई - ४०० ००४.
दूरभाष/फैक्स-०२२-२३८५७४५६.

खेमराज श्रीकृष्णदास
६६, हडपसर इण्डस्ट्रियल इस्टेट,
पुणे - ४११ ०१३.
दूरभाष-०२०-२६८७१०२५,
फैक्स -०२०-२६८७४९०७.

गंगाविष्णु श्रीकृष्णदास,
लक्ष्मी वेंकटेश्वर प्रेस व बुक डिपो
श्रीलक्ष्मीवेंकटेश्वर प्रेस बिल्डींग,
जूना छापाखाना गली, अहिल्याबाई चौक,
कल्याण, जि. ठाणे, महाराष्ट्र - ४२१ ३०१
दूरभाष/फैक्स- ०२५१-२२०९०६१.

खेमराज श्रीकृष्णदास
चौक, वाराणसी (उ.प्र.) २२१ ००१.
दूरभाष - ०५४२-२४२००७८

मुद्रक एवं प्रकाशकः
खेमराज श्रीकृष्णदास,
अध्यक्ष : श्रीवेंकटेश्वर प्रेस,
खेमराज श्रीकृष्णदास मार्ग, बम्बई-४०० ००४

KHEMRAJ SHRIKRISHNADASS